# Shri Svayamvara Parvati Mantramala Stotram

# શ્રીસ્વયંવરા પાર્વતી મન્ત્રમાલાસ્તોત્રમ્

## Document Information

Text title : Swayanvara pArvatI stotraM mantramAlAstotraM

File name : svayamvarampArvati.itx

Category : devii, pArvatI, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : Adwaith Menon

Proofread by : Adwaith Menon, Subhash Prajapati, Pooja

Latest update : August 22, 2010

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીસ્વયંવરા પાર્વતી મન્ત્રમાલાસ્તોત્રમ્

શ્રી દુર્વાસામુનિવિરચિતમ્
શ્રી સ્વયંવરા પાર્વતિ મન્ત્રમાલા સ્તોત્રમ્
(જપસહિતમ્)

ૐ અસ્ય શ્રી સ્વયંવર પાર્વતી મહા મન્ત્રસ્ય
અજ ઋષિઃ, પંક્તિઃ છન્દઃ સ્વયંવર પાર્વતી દેવતા ।

or

ૐ અસ્ય શ્રીસ્વયંવરમન્ત્રસ્ય બ્રહ્મા ઋષિઃ દેવીગાયત્રી છન્દઃ,
દેવી ગિરિપુત્રી સ્વયંવરા દેવતા ।
મમાભીષ્ટસિધ્યર્થે જપે વિનિયોગઃ ॥

હ્રાં ઇત્યાદિના ન્યાસઃ ।

or

ૐ અસ્ય શ્રીસ્વયંવરાપાર્વતી મન્ત્રસ્ય બ્રહ્મા ઋષિઃ,
દેવી ગાયત્રી છન્દઃ,
દેવી ગિરિપુત્રી સ્વયંવરા પાર્વતિ દેવતા ।
મમ શીઘ્રમેવ વિવાહ પ્રાપ્ત્યર્થે,
સર્વાભીષ્ટસિધ્યર્થે જપે વિનિયોગઃ ॥

કર ન્યાસં

ૐ હ્રાં જગ ત્રય વશ્ય મોહિન્યૈ, અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં ત્રૈલોક્ય વશ્ય મોહિન્યૈ, તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં ઉરગ વશ્ય મોહિન્યૈ, મધ્યમાભ્યાં નમઃ ।
ૐ હ્રૈં સર્વ રાજ વશ્ય મોહિન્યૈ, અનામિકાભ્યાં નમઃ ।
ૐ હ્રૌં સર્વ સ્ત્રી પુરુષ વશ્ય મોહિન્યૈ, કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હ્રઃ સર્વ વશ્ય મોહિન્યૈ, કરતલ કરપૃષ્ઠાભ્યાં નમઃ ॥

અઙ્ગ ન્યાસં

ૐ હ્રાં જગ ત્રય વશ્ય મોહિન્યૈ, હૃદયાય નમઃ ।
ૐ હ્રીં ત્રૈલોક્ય વશ્ય મોહિન્યૈ, શિરસે સ્વાહા ।
ૐ હ્રૂં ઉરગ વશ્ય મોહિન્યૈ, શિખાયૈ વષટ્ ।
ૐ હ્રૈં સર્વ રાજ વશ્ય મોહિન્યૈ, કવચાય હુમ્ ।
ૐ હ્રૌં સર્વ સ્ત્રી પુરુષ વશ્ય મોહિન્યૈ, નેત્રત્રયાય વૌષટ્ ।
ૐ હ્રઃ સર્વ વશ્ય મોહિન્યૈ, અસ્ત્રાય ફટ્ ।

ભૂર્ભુવઃ સુવરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનં

શમ્ભું જગન્મોહનરૂપપૂર્ણં var રૂપવર્ણં
વિલોક્ય લજ્જાકુલિતાં સ્મિતાઢ્યામ્ ।
મધૂકમાલાં સ્વસખીકરાભ્યાં
સમ્બિભ્રતીમાદ્રિસુતાં ભજેઽયમ્ ॥

॥ સ્વયંવરા ધ્યાનમ્ ॥

હેમાભાં મતિવાગતીતગુણશીલાન્તામશિલ્પાકૃતિં
પ્રેમારોહમનોહરાં કરલસત્કલ્યાણદામાન્વિતામ્ ।
શ્યામામીશ્વરમુદ્યતાં વરયિતું ત્રૈલોક્યસમ્મોહિનીં
કામાપાદનકલ્પવલ્લિમનિશં વન્દે પરાં દેવતામ્ ॥ ૧॥

Day/morning dhyaana shloka:

બાલાર્કાયુતસુપ્રભાં કરતલે રોલમ્બમાલાકુલાં
માલાં સન્દધતીં મનોહરતનું મન્દસ્મિતોદ્યન્મુખીમ્ ।
મન્દં મન્દમુપેયુષીં વરયિતું શમ્ભું જગન્મોહિનીં
વન્દે દેવમુનીન્દ્રવન્દિતપદામિષ્ટાર્થદાં પાર્વતીં ॥ ૨॥

Evening/night dhyaana shloka:

કરધૃત વરણમાલ્યા સર્વરત્નાઙ્ગભૂષા var વિધૃત
નિખિલનયનચેતોહારિરૂપાગ્ર્યવેષા ।
ભવતુ ભવદભીષ્ટપ્રાપ્તયે શૈલકન્યા
પુરુષયુવતિવશ્યાકૃષ્ટિનિત્યપ્રહર્ષા ॥ ૩॥

પઞ્ચપૂજાં

લં - પૃથ્વ્યાત્મિકાયૈ ગન્ધં સમર્પયામિ ।
હં - આકાશાત્મિકાયૈ પુષ્પૈઃ પૂજયામિ ।
યં - વાય્વાત્મિકાયૈ ધૂપમાઘ્રાપયામિ ।
રં - અગ્ન્યાત્મિકાયૈ દીપં દર્શયામિ ।
વં - અમૃતાત્મિકાયૈ અમૃત મહાનૈવેદ્યં નિવેદયામિ ।
સં - સર્વાત્મિકાયૈ સર્વોપચારપૂજાં સમર્પયામિ ॥

જપં

ૐ હ્રીં યોગિનિ યૌગિનિ યોગેશ્વરિ યોગભયંકરિ
સકલસ્થાવરજંગમસ્ય મુખહૃદયં
મમ વશં આકર્ષય આકર્ષય નમઃ। (સ્વાહા ।)

(૧૦૮ (૧૦૦૮) જપં કરિષ્યે ।)

ૐ હ્રાં હૃદયાય નમઃ ।
ૐ હ્રીં શિરસે સ્વાહા ।
ૐ હ્રૂં શિખાયૈ વષટ્ ।
ૐ હ્રૈં કવચાય હુમ્ ।
ૐ હ્રૌં નેત્રત્રયાય વૌષટ્ ।
ૐ હ્રઃ અસ્ત્રાય ફટ્ ।

ભૂર્ભુવઃ સુવરોમિતિ દિગ્વિમોક્ષઃ ॥ (var Digvimogam )

અથ સ્તોત્રમ્ ।

બન્ધૂકવર્ણામરુણાં સુગાત્રામ્
શમ્ભું સમુદ્દિશ્ય શનૈરુપેતામ્ ।
અમ્ભોજમૃદ્વીમભિલાષદાત્રીં
સમ્ભાવયે નિર્જરદારુકલ્પામ્ ॥ ૧॥

હ્રીં મન્થરાણિ ચરણાગ્રગતિપ્રપાતે-
ષ્વામઞ્જુસંક્વણિતકઙ્કણકિઙ્કિણીનિ ।
કામં કુમારિ! તવ તાનિ શિવે! સ્મરામિ
ક્ષેમઙ્કરાણિ જનકાલયખેલનાનિ ॥ ૨॥

યોગેન બાલ્યવયસો લલિતાં પુરસ્તાત્
  દ્રાગેવ કણ્ઠવિલસત્ કનકોર્મિકૌઘામ્ ।
આકમ્રનદ્ધરશનાં ભવતીં નિરીક્ષે
  શ્રીકણ્ઠભામિનિ! કદા પ્રપદીનવેણીમ્ ॥ ૩॥

ગિર્યલ્પમુગ્ધવિશદં નવયૌવનં શ્રી-
  ધુર્યં વિલાસમયમક્ષિણ કૃશં વિલગ્ને ।
પર્યુચ્ છ્રિતં કુચભરે જઘને ઘનં યત્
  પર્યુત્સુકોઽસ્મિ સતતં જનનિ પ્રસીદ ॥ ૪॥

નિર્ધૂતકુણ્ડલમુદઞ્ચિતઘર્મલેશં
  વિસ્રસ્તકેશમભિતશ્ચલદીક્ષણાન્તમ્ ।
નિર્ધ્વાનિકઙ્કણમુદગ્રકુચાન્તમન્તર્-
  બધ્નામિ તાતગૃહકન્દુકખેલનં તે ॥ ૫॥

યોગેશ્વરં પ્રચુરભક્તિ ગિરીશમારા-
  દેકાન્તવર્તિનમુપેત્ય તપશ્ચરન્તં ।
આકાંક્ષયા પરિચરિષ્ણુમનાકુલાં ત્વાં
  યે કેચિદીશ્વરિ ભજન્તિ ત એવ ધન્યાઃ ॥ ૬॥

ગિર્યાત્મજે! મદનદાહમહાવમાન-
  પર્યાકુલા પુરહરે હૃદયં નિધાય ।
કુર્યાસ્તપો વિદધતી કુશલાનિ ભૂભૃત્-
  પર્યાયપીનકુચકુમ્ભવિશુમ્ભદઙ્ગી ॥ ૭॥

નિધ્યાય માનસદૃશા મુહુરિન્દુચૂડં
  મદ્ધ્યે સ્થિતા રહસિ પઞ્ચહુતાશનાનામ્ ।
તત્તાદૃશેન તપસા જગદણ્ડભાજાં
  વિત્રાસદાત્રિ પરિપાહિ સદાશિવે! નઃ ॥ ૮॥

યોગ્યં વટોર્વપુરુપસ્થિતમાત્મભક્તિં
  દીર્ઘાં પરીક્ષિતુમનુક્ષણમાક્ષિપન્તમ્ ।
સાક્ષાગ્દિરીશમવધૂય રુષા પ્રયાતે
  દ્રાક્તેન સંશ્રિતપદાં ભવતીં ભજામઃ ॥ ૯॥

ગેહે નિજે વરણદામલસત્કરાબ્જાં

વ્યાહારિનૂપુરમુદઞ્ચિતમન્દહાસામ્ ।
નીહારુભાનુધરમુચ્ચલિતાં વરીતું
મોહાવહાં ત્રિભુવનસ્ય ભજામહે ત્વામ્ ॥ ૧૦॥

શ્વસ્તાહિ કઙ્કણવિલોકનભીતભીતં
પ્રત્યગ્રરાગવિવશં મમ તં નિધેહિ ।
ઉત્સ્વેદવેપથુ પિનાકભૃતા ગૃહીતં
રુદ્રાણિ દક્ષિણકરામ્બુજમુત્તમાંગે ॥ ૧૧॥

રિષ્ટાપહં ભવતુ ભર્તૃનખેન્દુબિમ્બ-
સ્પષ્ટાનુબિમ્બિતતનું વિબુધાપગાં તામ્ ।
દૃષ્ટ્વાશુ રાગરભસોદયશોણકોણં
દૃષ્ટિદ્વયં તવ કરગ્રહણે સ્થિતં નઃ ॥ ૧૨॥

યોગે નવે તવ ભવાનિ શિવાનિ દદ્યાત્
દ્રાગેવ સત્વરમપત્રપયા નિવૃત્તમ્ ।
સાકમ્પમાલિવચનૈર્વિહિતાભિમુખ્યં
દ્રાગુત્સ્મિતં પુરભિદા પરિરબ્ધમંગમ્ ॥ ૧૩॥

ગત્યા નિતમ્બભરમન્થરયા સલજ્જૈઃ
અર્ધેક્ષણૈરસકલાક્ષરવાગ્વિલાસૈઃ ।
હૃદ્યૈશ્ચ વિભ્રમગુણૈર્ મદનારિધૈર્ય-
પ્રસ્તારહારિણિ શિવે જનનિ પ્રસીદ ॥ ૧૪॥

ભદ્રા મુખેન્દુનમનાદભિવીક્ષણેષુ
પ્રત્યુક્તિદાનવિરમાન્નવસત્કથાસુ ।
ઉદ્વેપનાદપિ હઠાત્પરિરમ્ભણેષુ
પત્યુઃ પ્રમોદજનની જનનિ પ્રસીદ ॥ ૧૫॥

યં નાથમાદિમુનયો નિગમોક્તિગુમ્ભે-
ષ્વાલક્ષ્ય તાન્તમનસો વિમુખીભવન્તિ ।
સન્નહ્ય તેન દયિતેન મનોજવિદ્યા-
નન્દાનુભૂતિરસિકે જનનિ પ્રસીદ ॥ ૧૬॥

કલ્યાણકુન્તલભરં નવકલ્પવલ્લી-
પુષ્પોલ્લસદ્ બહુલસૌરભલોભનીયમ્ ।
કલ્યાણદામશશિખણ્ડમખણ્ડશોભા-

કલ્લોલિતં તવ મહેશ્વરિ સંશ્રયામઃ ॥ ૧૭॥

રિઞ્ચોલિકા તવ શિવે! નિટિલાલકાનાં
ન્યઞ્ચત્પટીરતિલકે નિટિલે વિભાન્તી ।
મઞ્જુપ્રસન્નમુખપદ્મવિહારિલક્ષ્મી-
પિઞ્છાતપત્રરુચિરા હૃદિ નઃ સમિન્ધામ્ ॥ ૧૮॥

સમ્યગ્ભ્રુવૌ તવ વિલાસભુવૌ સ્મરામઃ
સમ્મુગ્દ્ધ મન્મથશરાસનચારુરૂપે ।
હૃન્મધ્યગૂઢનિહિતં હરધૈર્યલક્ષ્યં
યન્મૂલયન્ત્રિતકટાક્ષશરૈર્વિભિન્નમ્ ॥ ૧૯॥

કમ્રાઃ સિતાસિતરુચા શ્રવણાન્તદીર્ઘાઃ
બિમ્બોકડમ્બરભૃતો નિભૃતાનુકમ્પાઃ ।
સમ્પાતુકા મયિ ભવન્તુ પિનાકિવક્ત્ર-
બિમ્બાબુજન્મમધુપાઃ સતિ! તે કટાક્ષાઃ ॥ ૨૦॥

લગ્નાભિરામમૃગનાભિવિચિત્રપત્રં
મગ્નં પ્રભાસમુદયે તવ ગણ્ડબિમ્બમ્ ।
ચિત્તે વિભાતુ સતતં મણિકુણ્ડલોદ્ય-
દ્રત્નાનુબિમ્બપરિચુમ્બિતમમ્બિકે નઃ ॥ ૨૧॥

સ્થાણોઃ સદા ભગવતઃ પ્રિયતાનિધાનં
પ્રાણાદપિ પ્રવિરલસ્મિતલોભનીયમ્ ।
સ્થાનીકુરુષ્વ ગિરિજે! તવ બન્ધુજીવ-
શ્રેણીસગન્ધમધરં ધિષણાન્તરે નઃ ॥ ૨૨॥

વન્દામહે કનકમંગલસૂત્રશોભા-
સન્દીપ્તકુઙ્કુમવલિત્રયભંગિ રમ્યમ્ ।
મન્દ્રાદિકસ્વરવિકસ્વરનાદવિદ્યા-
સન્દર્ભગર્ભમગજે! તવ કણ્ઠનાલમ્ ॥ ૨૩॥

રક્ષાર્થમત્ર મમ મૂર્ધનિ ધત્સ્વ નિત્યં
દક્ષારિગાઢપરિરમ્ભરસાનુકૂલમ્ ।
અક્ષામહેમકટકાંગદરત્નશોભં
લાક્ષાવિલં જનનિ! પાણિયુગં ત્વદીયમ્ ॥ ૨૪॥

જમ્ભારિકુમ્ભિવરકુમ્ભનિભામુરોજ-
 કુમ્ભદ્વયીં લલિતસમ્ભૃતરત્નમાલામ્ ।
શમ્ભોર્ભુજૈરનુદિનં નિબિડાંકપાલી-
 સમ્ભાવિતાં ભુવનસુન્દરિ! ભાવયામઃ ॥ ૨૫॥

ગર્વાપહે વટદલસ્ય તનૂદરાન્તે
 નિર્વ્યૂઢભાસિ તવ નાભિસરસ્યગાધે ।
શર્વાવલોકરુચિમેદુરરોમવલ્લી-
 નિર્વાસિતે વસતુ મે ધિષણામરાલી ॥ ૨૬॥

મચ્ચેતસિ સ્ફુરતુ મારરથાંગભંગીં
 ઉચ્ચૈર્દધાનમતિપીવરતાનિધાનમ્ ।
સ્વચ્છન્દરત્નરશનાકલિતાન્તરીય-
 પ્રચ્છન્નમમ્બ! તવ કમ્રનિતમ્બબિમ્બમ્ ॥ ૨૭॥

સ્યન્દાનુરાગમદવારિપુરારિચેતઃ
 સન્નાગબન્ધમણિવેણુકમૂરુકાણ્ડમ્ ।
બન્દીકૃતેન્દ્રગજપુષ્કરમુગ્ધરમ્ભં
 નન્દામ સુન્દરિ! શિવે! હૃદિ સન્દધાનાઃ ॥ ૨૮॥

મુગ્ધોલ્લસત્કનકનૂપુરનગ્ધનાના-
 રત્નાભયોર્ધ્વગતયા પરિતોઽભિરામમ્ ।
ચિત્તપ્રસૂતિજયકાહલકાન્તિ જંઘા-
 યુગ્મં ત્વદીયમગનન્દિનિ! ચિન્તયામઃ ॥ ૨૯॥

ખટ્વાંગપાણિમકુટેન તદા તદા સં-
 ઘૃષ્ટાગ્રયોઃ પ્રણતિષુ પ્રણયપ્રકોપે ।
અષ્ટાંગપાતસહિતં પ્રણતોઽસ્મિ લબ્ધું
 ઇષ્ટાં ગતિં જનનિ! પાદપયોજયોસ્તે ॥ ૩૦॥

હૃદ્દર્પણં મમ મૃજન્તુ તદા ત્વદંગ-
 મુદ્યદ્રવિદ્યુતિ ભવેદિહ સાનુબિમ્બમ્ ।
ઉત્તુંગદૈત્યસુરમૌલિભિરુહ્યમાના
 રુદ્રપ્રિયે! તવ પદાબ્જભવાઃ પરાગાઃ ॥ ૩૧॥

દદ્યાઃ સુખાનિ મમ ચક્રકલાન્તરસ્થા!
 રક્તામ્બરાભરણમાલ્યધરા! જપાભા! ।

રુદ્રાણિ! પાશસૃણિચાપશરાગ્રહસ્તા!
 કસ્તૂરિકાતિલકિની! નવકુઙ્કુમાર્દ્રા! ॥ ૩૨॥

યત્પઙ્કજન્મનિલયં કરપદ્મશુમ્ભ-
 દમ્ભોરુહં ભુવનમંગલમાદ્રિયન્તે ।
અમ્ભોરુહાક્ષ સુકૃતોત્કરપાકમેકં
 સમ્ભાવયે હૃદિ શિવે! તવ શક્તિભેદં ॥ ૩૩॥

મન્દારકુન્દસુષમા કરપલ્લવોદ્યત્
 પુણ્યાક્ષદામવરપુસ્તકપૂર્ણકુમ્ભા ।
ચન્દ્રાર્દ્ધચારુમકુટા નવપદ્મસંસ્થા
 સન્દેદિવીતુ ભવતી હૃદિ નસ્ત્રિણેત્રા ॥ ૩૪॥

મધ્યેકદમ્બવનમાસ્થિતરત્નડોલાં
 ઉદ્યન્નખાગ્રમુખરીકૃતરત્નવીણામ્ ।
અત્યન્તનીલકમનીયકલેવરાં ત્વાં
 ઉત્સંગલાલિતમનોજ્ઞશુકીમુપાસે ॥ ૩૫॥

વર્તામહે મનસિ સન્દધતીં નિતાન્ત-
 રક્તાં વરાભયવિરાજિકરારવિન્દામ્ ।
ઉદ્વેલમધ્યવસતિં મધુરાંગિ! માયાં
 તત્ત્વાત્મિકાં ભગવતીં ભવતીં ભજન્તઃ ॥ ૩૬॥

શમ્ભુપ્રિયાં શશિકલાકલિતાવતંસાં
 સમ્ભાવિતાભયવરાં કુશપાશપાણિમ્ ।
સમ્પાત્પ્રદાનનિરતાં ભુવનેશ્વરીં ત્વાં
 શુમ્ભજ્જપારુચમપારકૃપામુપાસે ॥ ૩૭॥

આરૂઢતુંગતુરગાં મૃદુબાહુવલ્લીં
 આરૂઢપાશસૃણિવેત્રલતાં ત્રિનેત્રામ્ ।
આરોપિતામખિલસન્વનને પ્રગલ્ભાં
 આરાધયામિ ભવતીં મનસા મનોજ્ઞામ્ ॥ ૩૮॥

કર્માત્મિકે જય જયાખિલધર્મમૂર્તે
 ચિન્માત્રિકે, જય જય ત્રિગુણસ્વરૂપે ।
કલ્માષધર્મપિશુનાન્ કરુણામૃતાર્દ્રૈઃ
 સમ્માર્જ્ય સમ્યગભિષિઞ્ચ દૃગઞ્ચલૈર્ નઃ ॥ ૩૯॥

ષણ્ણામસિ ત્વમધિદૈવતમક્ષરાણાં
　　વર્ણત્રયોદિતમનુપ્રકૃતિસ્ત્વમેવ ।
ત્વન્નામ વિશ્વમનુશક્તિકલં ત્વદન્યત્
　　કિન્નામ દૈવતમિહાસ્તિ સમસ્તમૂર્ત્તે ॥ ૪૦॥

યા કાપિ વિશ્વજનમોહનદિવ્યમાયા
　　શ્રીકામવૈરિવપુરર્ધહરાનુભાવા ।
પ્રાકાશ્યતે જગદધીશ્વરિ! સા ત્વમસ્માન્
　　મૂકાનનન્યશરણાન્ પરિપાહિ દીનાન્ ॥ ૪૧॥

કર્ત્ર્યૈ નમોઽસ્તુ જગતોનિખિલસ્ય ભર્ત્ર્યૈ
　　હર્ત્ર્યૈ નમોઽસ્તુ વિધિવિષ્ણુહરાત્મશક્ત્યૈ ।
ભુક્ત્યૈ નમોઽસ્તુ ભુવનાભિમતપ્રસૂત્યૈ
　　મુક્ત્યૈ નમોઽસ્તુ મુનિમણ્ડલદૃશ્યમૂર્ત્યૈ ॥ ૪૨॥

ષડ્વક્ત્રહસ્તિમુખજુષ્ટપદસ્ય ભર્તુઃ
　　ઇષ્ટોપગૂહનસુધાપ્લુતમાનસસ્ય ।
દૃષ્ટ્યા નિપીય વદનેન્દુમદક્ષિણાઙ્કે
　　તુષ્ટ્યા સ્થિતે! વિતર દેવિ! દયાવલોકાન્ ॥ ૪૩॥

યત્નાન્તરં ભવિતૃભૂતભવં મયા યત્
　　સ્વપ્નપ્રજાગરસુષુપ્તિષુ વાઙ્મનોઽઙ્ગૈઃ ।
નિત્યં ત્વદર્ચનકલાસુ સમસ્તમેતત્
　　ભક્તાનુકમ્પિનિ! મમાસ્તુ તવ પ્રસાદાત્ ॥ ૪૪॥

સ્વાહેતિ સાગરસુતેતિ સુરાપગેતિ
　　વ્યાહારરૂપસુષમેતિ હરિપ્રિયેતિ ।
નીહારશૈલતનયેતિ પૃથક્પ્રકાશ-
　　રૂપાં પરેશમહિષીં ભવતીં ભજામઃ ॥ ૪૫॥

હારસ્ફુરત્કુચગિરે! હરજીવનાથે!
　　હારિસ્વરૂપિણિ! હરિપ્રમુખાભિવન્દ્યે! ।
હેરમ્બશક્તિધરનન્દિનિ! હેમવર્ણે!
　　હે ચણ્ડિ! હૈમવતિ! દેવિ! નમો નમસ્તે ॥ ૪૬॥

યે તુ સ્વયંવરમહાસ્તવમન્ત્રમેતં

પ્રાતર્નરાઃ સકલસિદ્ધિકરં જપન્તિ ।
ભૂતિપ્રભાવજનરઞ્જનકીર્ત્તિસૌન્દર્ય-
આરોગ્યમાયુરપિ દીર્ઘમમી લભન્તે ॥ ૪૭॥

શતક્રતુપ્રભૃત્યમર્ત્યતત્યભિપ્રણત્યુપ-
ક્રમપ્રસૃત્વરસ્મિતપ્રભાઞ્ચિતાસ્યપઙ્કજે ।
હરપ્રિયે! વરપ્રદે! ધરાધરેન્દ્રકન્યકે
હરિદ્રયા સમન્વિતે દરિદ્રતાં હર દ્રુતં ॥ ૪૮॥

Encoded by Adwaith Menon

Proofread by Adwath, Subhash Prajapati, Pooja P

*Shri Svayamvara Parvati Mantramala Stotram*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*